# Shri Bala Nyasavidhi

# શ્રીબાલાન્યાસવિધિઃ

## Document Information

Text title : Shri Bala Nyasavidhi

File name : bAlAnyAsavidhiH.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીબાલાન્યાસવિધિઃ

અસ્ય શ્રીબાલાન્યાસમહામન્ત્રસ્ય દક્ષિણામૂર્તિઃ ઋષિઃ ।
દેવી ગાયત્રી છન્દઃ । શ્રીબાલાપરમેશ્વરી દેવતા ।
ઐં બીજમ્ । ક્લીં શક્તિઃ । સૌઃ કીલકમ્ ।
શ્રીબાલાત્રિપુરસુન્દરીપ્રીત્યર્થે જપે વિનિયોગઃ ।
મૂલેન ન્યાસઃ ।
ધ્યાનં -
શબ્દબ્રહ્મમયી ચરાચરમયી જ્યોતિર્મયી વાઙ્મયી
નિત્યાનન્દમયી નિરઞ્જનમયી સમ્પન્મયી ચિન્મયી ।
તત્ત્વાતીતમયી પરાત્પરમયી માયામયી શ્રીમયી
સર્વૈશ્વર્યમયી સદાશિવમયી માં પહિ બાલામ્બિકે ॥

લમિત્યાદિ પઞ્ચપૂજા ।
બાલામ્બિકાયૈ નમઃ (પ્રાચ્યાં) ।
કુમારિકાયૈ નમઃ (દક્ષિણસ્યાં) ।
લલિતા પુત્ર્યૈ નમઃ (પશ્ચિમાયાં) ।
શામ્ભવ્યૈ નમઃ (ઉત્તરસ્યામ્) ।
ભણ્ડપુત્રદમન્યૈ નમઃ (આગ્નેય્યાં) ।
ચિન્મય્યૈ નમઃ (નૈરૃત્યાં) ।
ઈશનન્દિન્યૈ નમઃ (વાયવ્યાં) ।
દેવ્યૈ નમઃ (ઐશાન્યાં) ।
બ્રહ્માણ્ડરૂપિણ્યૈ નમઃ (ઊર્ધ્વાયાં) ।
સર્વરૂપાયૈ નમઃ (અધઃ) ।
ઐઙ્કાર્યૈ નમઃ (મૂર્ધ્નિ) ।
ક્લીઙ્કાયૈ નમઃ (ફાલમધ્યે)
સૌઃ કાર્યૈ નમઃ (વક્ત્રે) ।
કામેશ્યૈ નમઃ (કણ્ઠદેશે) ।

ચતુર્ભુજાયૈ નમઃ (હૃદયદેશે) ।
અભયપ્રદાયૈ નમઃ (વામે સ્તને) ।
શક્ત્યૈ નમઃ (દક્ષિણસ્તને) ।
સર્વાઙ્ગસુન્દર્યૈ નમઃ (કુક્ષૌ) ।
મણિનિભચ્છાયાયૈ નમઃ (નાભૌ) ।
પાટલપ્રભાયૈ નમઃ (જઘને) ।
પરમાયૈ નમઃ (ઊરુદ્વન્દ્વે)।
શિવયોગિન્યૈ નમઃ (જાન્વોઃ)
મહામાયાયૈ નમઃ (જઙ્ઘાદ્વયે) ।
પરાત્પરાયૈ નમઃ (પાદદ્વન્દ્વે) ।
આત્માનન્દ સ્વરૂપિણ્યૈ નમઃ (હસ્તયોઃ) ।
પઞ્ચબ્રહ્મમય્યૈ દેવ્યૈ નમઃ (પાર્શ્વયોઃ) ।
નારદાદિભિરર્ચિતાયૈ નમઃ (નેત્રાયોઃ) ।
દુષ્ટપ્રશમન્યૈ દેવ્યૈ નમઃ (પૃષ્ઠે) ।
ભુવનાનન્દકારિણ્યૈ અમ્બાયૈ નમઃ (નાસાગ્રે) ।
નવમાણિક્યશોભાઢ્યાયૈ નમઃ (કપોલયોઃ) ।
દશોર્ધ્વવયસોપેતાયૈ નમઃ (દન્તેષુ) ।
શ્રુત્યર્થફલદાયિન્યૈ નમઃ (કર્ણયોઃ) ।
ઐં શૈલપુત્ર્યૈ નમઃ (પાદયોઃ) ।
ક્લીં બ્રહ્મચારિણ્યૈ નમઃ (જાન્વોઃ) ।
સૌઃ બ્રહ્મચારિણ્યૈ નમઃ (કટ્યામ્) ।
સૌઃ કૂશ્માણ્ડાયૈ નમઃ (નાભૌ) ।
ક્લીં સ્કન્દમાત્રે નમઃ (કુક્ષૌ) ।
ઐં કાત્યાયિન્યૈ નમઃ । (હૃદયે) ।
ઐં કાલરાર્ત્યૈ નમઃ (કણ્ઠે) ।
ક્લીં મહાગૌર્યૈ નમઃ (મુખે) ।
સૌઃ સિદ્ધિપ્રદાયૈ નમઃ (લલાટે) ।
સૌઃ બાલાપરમેશ્વર્યૈ નમઃ (બ્રહ્મરન્ધ્રે) ।
ક્લીં મહાલક્ષ્મ્યૈ નમઃ (દક્ષિણપાર્શ્વે) ।
ઐં મહાસરસ્વત્યૈ નમઃ (વામપાશ્વે) ।

કિરિટ કુણ્ડલોપેતાં કઙ્કણાઙ્ગદધારિણીમ્ ।

પીતવસ્ત્રેણ સંયુક્તાં બ્રહ્માનન્દફલપ્રદામ્ ॥

બ્રહ્માદિ દૈવતૈઃ પૂજ્યાં બ્રહ્માનન્દવિવર્ધિનીમ્ ।
માણિક્ય મકુટોપેતાં અઙ્ગૈરલઙ્કૃતાં શુભામ્ ॥

સર્વદેવૈઃ પરિવૃતાં સર્વસિદ્ધૈર્નિષેવિતામ્ ।
સર્વમન્ત્રફલોપેતાં સામ્રાજ્યફલદાયિનીમ્ ।
રમાવાણી સમોપેતાં રાજરાજાર્ચિતાઙ્ઘ્રિકામ્ ॥

સાક્ષાદ્બ્રહ્મમયીં દેવીં ચિન્તયે સર્વતો મમ ॥

બાલાધ્યાનં
ઈક્ષે બાલાં પરાં શક્તિં લલિતાતનયાં શિવામ્ ।
કોટિસૂર્યપ્રતીકાશાં ચન્દ્રકોટિસુશીતલામ્ ॥

હૃત્પુણ્ડરીકનિલયાં પૂગસ્તનવિરાજિતામ્ ।
બાલાર્કકિરણોપેતાં ભાલચન્દ્રધરાં શિવામ્ ॥

અક્ષમાલાપુસ્તધરાં વરદાભયશોભિતામ્ ।
સર્વાભરણશોભાઢ્યાં સર્વાવયવસુન્દરીમ્ ॥

અનેકકોટિ બ્રહ્માણ્ડપાલિનીં સુરસેવિતામ્ ।
ફુલ્લપઙ્કજમધ્યસ્થાં પૂર્ણાનન્દવપુર્ધરામ્ ॥

માતૃકાવર્ણપીઠસ્થાં મન્ત્રકોટિસ્વરૂપિણીમ્ ।
ગગનાકારસદૃશાં ખગમધ્વજસોદરીમ્ ॥

કામેશ્વરસ્ય તનયાં ગાનલોલાં શુભાનનામ્ ।
બ્રાહ્મી માહેશ્વરીમુખ્યૈઃ સેવિતાં સિદ્ધપૂજિતામ્ ।
ધ્યાયામિ તાં પરાં શક્તિં બાલાં કામેશ્વરીસુતામ્ ॥

ઇતિ શ્રીબાલાન્યાસવિધિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*Shri Bala Nyasavidhi*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*